শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৮৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮৫

*জরাসন্ধৱধৱর্ণনং রাজসূযৱর্ণনং চ*

তত‍ো মগধভূভৃতা চিরনির‍োধসংক্লেশিতং
    শতাষ্টকযুতাযুতদ্বিতযমীশ ভূমীভৃতাম্।
অনাথশরণায তে কমপি পূরুষং প্রাহিণ‍ো-
    দযাচত স মাগধক্ষপণমেৱ কিং ভূযসা॥ ১ ॥

যিযাসুরভিমাগধং তদনু নারদ‍োদীরিতা-
    দ্যুধিষ্ঠিরমখ‍োদ্যমাদুভযকার্যপর্যাকুলঃ।
ৱিরুদ্ধজযিন‍োধ্ৱরাদুভযসিদ্ধিরিত্যুদ্ধৱে
    শশংসুষি নিজৈঃ সমং পুরমিযেথ যৌধিষ্ঠিরীম্॥ ২ ॥

অশেষদযিতাযুতে ত্বযি সমাগতে ধর্মজ‍ো
    ৱিজিত্য সহজৈর্মহীং ভৱদপাঙ্গসংৱর্ধিতৈঃ।
শ্রিযং নিরুপমাং ৱহন্নহহ ভক্তদাসাযিতং
    ভৱন্তমযি মাগধে প্রহিতৱান্ সভীমার্জুনম্॥ ৩ ॥

গিরিব্রজপুরং গতাস্তদনু দেৱ যূযং ত্রয‍ো
    যযাচ সমর‍োতসৱং দ্বিজমিষেণ তং মাগধম্।
অপূর্ণসুকৃতং ত্বমুং পৱনজেন সঙ্গ্রামযন্
    নিরীক্ষ্য সহ জিষ্ণুনা ত্বমপি রাজযুদ্ধ্ৱা স্থিতঃ॥ ৪ ॥

অশান্তসমর‍োদ্ধতং ৱিটপপাটনাসংজ্ঞযা
    নিপাত্য জরসসসুতং পৱনজেন নিষ্পাটিতম্।
ৱিমুচ্য নৃপতীন্ মুদা সমনুগৃহ্য ভক্তিং পরাং
    দিদেশিথ গতস্পৃহানপি চ ধর্মগুপ্ত্যৈ ভুৱঃ॥ ৫ ॥

প্ৰচক্ৰুষি যুধিষ্ঠিৰে তদনু ৰাজসূযাধ্ৱৰং
প্ৰসন্নভৃতকীভৱতসকলৰাজকৱ্যাকুলম্।
ত্ৱমপ্যযি জগতপতে দ্ৱিজপদাৱনেজাদিকং
চকর্থ কিমু কথ্যতে নৃপৱৰস্য ভাগ্যোন্নতিঃ॥ ৬ ॥

ততঃ সৱনকর্মণি প্ৰৱৰমগ্ৰ্যপূজাৱিধিং
ৱিচার্য সহদেৱৱাগনুগতঃ স ধর্মাত্মজঃ।
ৱ্যধত্ত ভৱতে মুদা সদসি ৱিশ্ৱভূতাত্মনে
তদা সসুৰমানুষং ভুৱনমেৱ তৃপ্তিং দধৌ॥ ৭ ॥

ততঃ সপদি চেদিপো মুনিনৃপেষু তিষ্ঠৎস্ৱহো
সভাজযতি কো জডঃ পশুপদুর্দুৰূটং ৱটুম্।
ইতি ত্ৱযি স দুৰ্ৱচোৱিততিমুদ্ৱমন্নাসনা-
দুদাপতদুদাযুধঃ সমপতন্নমুং পাণ্ডৱাঃ॥ ৮ ॥

নিৱার্য নিজপক্ষগানভিমুখস্য ৱিদ্ৱেষিণ-
স্ত্ৱমেৱ জহৃষে শিৰো দনুজদাৰিণা স্ৱাৰিণা।
জনুস্ত্ৰিতযলব্ধযা সততচিন্তযা শুদ্ধধী-
স্ত্ৱযা স পৰমেকতামধৃত যোগিনাং দুর্লভাম্॥ ৯ ॥

ততঃ সুমহিতে ত্ৱযা ক্ৰতুৱৰে নিৰূঢে জনো
যযৌ জযতি ধর্মজো জযতি কৃষ্ণ ইত্যালপন্।
খলঃ স তু সুযোধনো ধুতমনাসসপত্নশ্ৰিযা
মযার্পিতসভামুখে স্থলজলভ্ৰমাদভ্ৰমীত্॥ ১০ ॥

তদা হসিতমুত্থিতং দ্ৰুপদনন্দনাভীমযো-
ৰপাঙ্গকলযা ৱিভো কিমপি তাৱদুজ্জৃম্ভযন্।
ধৰাভৰনিৰাকৃতৌ সপদি নাম বীজং ৱপন্
জনার্দন মৰুতপুৰীনিলয পাহি মামামযাত্॥ ১১ ॥

**********